

# શ્રી રુદ્રં ચમકમ્-ઓં અગ્નાવિષ્ણો સજોષસેમાવર્ધંતુ

https://www.chalisa.online

|| શ્રી રુદ્રં ચમકમ્ ||

ઓં અગ્નાવિષ્ણો સજોષસેમાવર્ધંતુ વાં ગિરઃ । દ્યુમ્નૈર્વાજેભિરાગતમ્ । વાજશ્ચ
મે પ્રસવશ્ચ મે પ્રયતિશ્ચ મે પ્રસિતિશ્ચ મે ધીતિશ્ચ મે ક્રતુશ્ચ મે સ્વરશ્ચ
મે શ્લોકશ્ચ મે શ્રાવશ્ચ મે શ્રુતિશ્ચ મે જ્યોતિશ્ચ મે સુવશ્ચ મે પ્રાણશ્ચ
મેઽપાનશ્ચ મે વ્યાનશ્ચ મેઽસુશ્ચ મે ચિત્તં ચ મ આધીતં ચ મે વાક્ચ મે મનશ્ચ મે
ચક્ષુશ્ચ મે શ્રોત્રં ચ મે દક્ષશ્ચ મે બલં ચ મ ઓજશ્ચ મે સહશ્ચ મ આયુશ્ચ મે
જરા ચ મ આત્મા ચ મે તનૂશ્ચ મે શર્મ ચ મે વર્મ ચ મેઽંગાનિ ચ મેઽસ્થાનિ ચ મે
પરૂગ્-મ્ષિ ચ મે શરીરાણિ ચ મે ॥ 1 ॥

જૈષ્ઠ્યં ચ મ આધિપત્યં ચ મે મન્યુશ્ચ મે ભામશ્ચ મેઽમશ્ચ મેઽંભશ્ચ મે જેમા ચ
મે મહિમા ચ મે વરિમા ચ મે પ્રથિમા ચ મે વર્ષ્મા ચ મે દ્રાઘુયા ચ મે વૃદ્ધં
ચ મે વૃદ્ધિશ્ચ મે સત્યં ચ મે શ્રદ્ધા ચ મે જગચ્ચ મે ધનં ચ મે વશશ્ચ મે ત્વિષિશ્ચ
મે ક્રીડા ચ મે મોદશ્ચ મે જાતં ચ મે જનિષ્યમાણં ચ મે સૂક્તં ચ મે સુકૃતં ચ
મે વિત્તં ચ મે વેદ્યં ચ મે ભૂતં ચ મે ભવિષ્યચ્ચ મે સુગં ચ મે સુપથં ચ મ ઋદ્ધં
ચ મ ઋદ્ધિશ્ચ મે ક્લુપ્તં ચ મે ક્લુપ્તિશ્ચ મે મતિશ્ચ મે સુમતિશ્ચ મે ॥ 2 ॥

શં ચ મે મયશ્ચ મે પ્રિયં ચ મેઽનુકામશ્ચ મે કામશ્ચ મે સૌમનસશ્ચ મે ભદ્રં ચ મે
શ્રેયશ્ચ મે વસ્યશ્ચ મે યશશ્ચ મે ભગશ્ચ મે દ્રવિણં ચ મે યંતા ચ મે ધર્તા ચ
મે ક્ષેમશ્ચ મે ધૃતિશ્ચ મે વિશ્વં ચ મે મહશ્ચ મે સંવિચ્ચ મે જ્ઞાત્રં ચ મે
સૂશ્ચ મે પ્રસૂશ્ચ મે સીરં ચ મે લયશ્ચ મ ઋતં ચ મેઽમૃતં ચ મેઽયક્ષ્મં ચ મેઽનામયચ્ચ
મે જીવાતુશ્ચ મે દીર્ઘાયુત્વં ચ મેઽનમિત્રં ચ મેઽભયં ચ મે સુગં ચ મે શયનં ચ
મે સૂષા ચ મે સુદિનં ચ મે ॥ 3 ॥

ઊર્ક્ચ મે સૂનૃતા ચ મે પયશ્ચ મે રસશ્ચ મે ઘૃતં ચ મે મધુ ચ મે સગ્ધિશ્ચ મે સપીતિશ્ચ
મે કૃષિશ્ચ મે વૃષ્ટિશ્ચ મે જૈત્રં ચ મ ઔદ્ભિધં ચ મે રયિશ્ચ મે રાયશ્ચ મે
પુષ્ટં ચ મે પુષ્ટિશ્ચ મે વિભુ ચ મે પ્રભુ ચ મે બહુ ચ મે ભૂયશ્ચ મે પૂર્ણં
ચ મે પૂર્ણતરં ચ મેઽક્ષિતિશ્ચ મે કૂયવાશ્ચ મેઽન્નં ચ મેઽક્ષુચ્ચ મે વ્રીહયશ્ચ
મે યવાશ્ચ મે માષાશ્ચ મે તિલાશ્ચ મે મુદ્ગાશ્ચ મે ખલ્વાશ્ચ મે ગોધૂમાશ્ચ મે
મસુરાશ્ચ મે પ્રિયંગવશ્ચ મેઽણવશ્ચ મે શ્યામાકાશ્ચ મે નીવારાશ્ચ મે ॥ 4 ॥

અશ્મા ચ મે મૃત્તિકા ચ મે ગિરયશ્ચ મે પર્વતાશ્ચ મે સિકતાશ્ચ મે વનસ્પતયશ્ચ
મે હિરણ્યં ચ મેઽયશ્ચ મે સીસં ચ મે ત્રપુશ્ચ મે શ્યામં ચ મે લોહં ચ મેઽગ્નિશ્ચ
મ આપશ્ચ મે વીરુધશ્ચ મ ઓષધયશ્ચ મે કૃષ્ટપચ્યં ચ મેઽકૃષ્ટપચ્યં ચ મે ગ્રામ્યાશ્ચ
મે પશવ આરણ્યાશ્ચ યજ્ઞેન કલ્પંતાં વિત્તં ચ મે વિત્તિશ્ચ મે ભૂતં ચ મે ભૂતિશ્ચ
મે વસુ ચ મે વસતિશ્ચ મે કર્મ ચ મે શક્તિશ્ચ મેઽર્થશ્ચ મ એમશ્ચ મ ઇતિશ્ચ મે
ગતિશ્ચ મે ॥ 5 ॥

અગ્નિશ્ચ મ ઇંદ્રશ્ચ મે સોમશ્ચ મ ઇંદ્રશ્ચ મે સવિતા ચ મ ઇંદ્રશ્ચ મે સરસ્વતી
ચ મ ઇંદ્રશ્ચ મે પૂષા ચ મ ઇંદ્રશ્ચ મે બૃહસ્પતિશ્ચ મ ઇંદ્રશ્ચ મે મિત્રશ્ચ
મ ઇંદ્રશ્ચ મે વરુણશ્ચ મ ઇંદ્રશ્ચ મે ત્વષ્ઠા ચ મ ઇંદ્રશ્ચ મે ધાતા ચ મ ઇંદ્રશ્ચ
મે વિષ્ણુશ્ચ મ ઇંદ્રશ્ચ મેઽશ્વિનૌ ચ મ ઇંદ્રશ્ચ મે મરુતશ્ચ મ ઇંદ્રશ્ચ મે
વિશ્વે ચ મે દેવા ઇંદ્રશ્ચ મે પૃથિવી ચ મ ઇંદ્રશ્ચ મેઽંતરિક્ષં ચ મ ઇંદ્રશ્ચ
મે દ્યૌશ્ચ મ ઇંદ્રશ્ચ મે દિશશ્ચ મ ઇંદ્રશ્ચ મે મૂર્ધા ચ મ ઇંદ્રશ્ચ મે પ્રજાપતિશ્ચ
મ ઇંદ્રશ્ચ મે ॥ 6 ॥

અગ્-મ્શુશ્ચ મે રશ્મિશ્ચ મેઽદાભ્યશ્ચ મેઽધિપતિશ્ચ મ ઉપાગ્-મ્શુશ્ચ મેઽંતર્યામશ્ચ
મ ઐંદ્રવાયવશ્ચ મે મૈત્રાવરુણશ્ચ મ આશ્વિનશ્ચ મે પ્રતિપ્રસ્થાનશ્ચ મે શુક્રશ્ચ
મે મંથી ચ મ આગ્રયણશ્ચ મે વૈશ્વદેવશ્ચ મે ધ્રુવશ્ચ મે વૈશ્વાનરશ્ચ મ ઋતુગ્રહાશ્ચ
મેઽતિગ્રાહ્યાશ્ચ મ ઐંદ્રાગ્નશ્ચ મે વૈશ્વદેવશ્ચ મે મરુત્વતીયાશ્ચ મે માહેંદ્રશ્ચ
મ આદિત્યશ્ચ મે સાવિત્રશ્ચ મે સારસ્વતશ્ચ મે પૌષ્ણશ્ચ મે પાત્નીવતશ્ચ મે હારિયોજનશ્ચ
મે ॥ 7 ॥

ઇધ્મશ્ચ મે બર્હિશ્ચ મે વેદિશ્ચ મે દિષ્ણિયાશ્ચ મે સ્રુચશ્ચ મે ચમસાશ્ચ મે
ગ્રાવાણશ્ચ મે સ્વરવશ્ચ મ ઉપરવાશ્ચ મેઽધિષવણે ચ મે દ્રોણકલશશ્ચ મે વાયવ્યાનિ
ચ મે પૂતભૃચ્ચ મ આધવનીયશ્ચ મ આગ્નીધ્રં ચ મે હવિર્ધાનં ચ મે ગૃહાશ્ચ મે સદશ્ચ
મે પુરોડાશાશ્ચ મે પચતાશ્ચ મેઽવભૃથશ્ચ મે સ્વગાકારશ્ચ મે ॥ 8 ॥

અગ્નિશ્ચ મે ઘર્મશ્ચ મેઽર્કશ્ચ મે સૂર્યશ્ચ મે પ્રાણશ્ચ મેઽશ્વમેધશ્ચ મે પૃથિવી
ચ મેઽદિતિશ્ચ મે દિતિશ્ચ મે દ્યૌશ્ચ મે શક્વરીરંગુલયો દિશશ્ચ મે યજ્ઞેન કલ્પંતામૃક્ચ
મે સામ ચ મે સ્તોમશ્ચ મે યજુશ્ચ મે દીક્ષા ચ મે તપશ્ચ મ ઋતુશ્ચ મે વ્રતં ચ
મેઽહોરાત્રયોર્-દૃષ્ટ્યા બૃહદ્રથંતરે ચ મે યજ્ઞેન કલ્પેતાં ॥ 9 ॥

ગર્ભાશ્ચ મે વત્સાશ્ચ મે ત્ર્યવિશ્ચ મે ત્ર્યવીચ મે દિત્યવાટ્ ચ મે દિત્યૌહી
ચ મે પંચાવિશ્ચ મે પંચાવી ચ મે ત્રિવત્સશ્ચ મે ત્રિવત્સા ચ મે તુર્યવાટ્ ચ
મે તુર્યૌહી ચ મે પષ્ઠવાટ્ ચ મે પષ્ઠૌહી ચ મ ઉક્ષા ચ મે વશા ચ મ ઋષભશ્ચ મે
વેહચ્ચ મેઽનડ્વાં ચ મે ધેનુશ્ચ મ આયુર્-યજ્ઞેન કલ્પતાં પ્રાણો યજ્ઞેન કલ્પતામ્-અપાનો
યજ્ઞેન કલ્પતાં વ્યાનો યજ્ઞેન કલ્પતાં ચક્ષુર્-યજ્ઞેન કલ્પતાગ્ શ્રોત્રં યજ્ઞેન
કલ્પતાં મનો યજ્ઞેન કલ્પતાં વાગ્-યજ્ઞેન કલ્પતામ્-આત્મા યજ્ઞેન કલ્પતાં યજ્ઞો
યજ્ઞેન કલ્પતામ્ ॥ 10 ॥

એકા ચ મે તિસ્રશ્ચ મે પંચ ચ મે સપ્ત ચ મે નવ ચ મ એકાદશ ચ મે ત્રયોદશ ચ મે પંચદશ
ચ મે સપ્તદશ ચ મે નવદશ ચ મ એકવિગ્-મ્શતિશ્ચ મે ત્રયોવિગ્-મ્શતિશ્ચ મે પંચવિગ્-મ્શતિશ્ચ
મે સપ્ત વિગ્-મ્શતિશ્ચ મે નવવિગ્-મ્શતિશ્ચ મ એકત્રિગ્-મ્શચ્ચ મે ત્રયસ્ત્રિગ્-મ્શચ્ચ
મે ચતસ્-રશ્ચ મેઽષ્ટૌ ચ મે દ્વાદશ ચ મે ષોડશ ચ મે વિગ્-મ્શતિશ્ચ મે ચતુર્વિગ્-મ્શતિશ્ચ
મેઽષ્ટાવિગ્-મ્શતિશ્ચ મે દ્વાત્રિગ્-મ્શચ્ચ મે ષટ્-ત્રિગ્-મ્શચ્ચ મે ચત્વારિગ્-મ્શચ્ચ
મે ચતુશ્ચત્વારિગ્-મ્શચ્ચ મેઽષ્ટાચત્વારિગ્-મ્શચ્ચ મે વાજશ્ચ પ્રસવશ્ચાપિજશ્ચ
ક્રતુશ્ચ સુવશ્ચ મૂર્ધા ચ વ્યશ્નિયશ્ચાંત્યાયનશ્ચાંત્યશ્ચ ભૌવનશ્ચ ભુવનશ્ચાધિપતિશ્ચ
॥ 11 ॥

ઓં ઇડા દેવહૂર્-મનુર્-યજ્ઞનીર્-બૃહસ્પતિરુક્થામદાનિ શગ્-મ્સિષદ્-વિશ્વે-દેવાઃ
સૂક્તવાચઃ પૃથિવિમાતર્મા મા હિગ્-મ્સીર્-મધુ મનિષ્યે મધુ જનિષ્યે મધુ વક્ષ્યામિ
મધુ વદિષ્યામિ મધુમતીં દેવેભ્યો વાચમુધાસગ્-મ્શુશ્રૂષેણ્યામ્ મનુષ્યેભ્યસ્તં
મા દેવા અવંતુ શોભાયૈ પિતરોઽનુમદંતુ ॥
ઓં શાંતિઃ શાંતિઃ શાંતિઃ ॥

|| https://www.chalisa.online ||